শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী পার্থসারথ্যষ্টোত্তরশতনামস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী পার্থসারথ্যষ্টোত্তরশতনামস্তোত্রম্ ॥

## ধ্যানম্

মুরান্তকং সুরার্চিতং ধরাপতিং পরাৎপরং
নিরামযং জরাহরং করেণ ৱেত্রধারিণম্।
সদা ঋতে প্রতিষ্ঠিতং ভজামি ৱিশ্ৱরূপিণং
সদাশিৱপ্রিযং হরিং নমামি পার্থসারথিম্॥ **1** ॥

ভূপেন তেন মুচুকুন্দ মহাত্মনা যঃ
সংস্থাপিতোঽত্র মুচুকুন্দপুরে মনোজ্ঞে।
শঙ্খেন চারুতরৱেত্রধৃতেন দোষ্ণা
সংক্ষোভযন্তমখিলং ভুৱনং তমীডে॥ **2** ॥

পার্থস্য যুদ্ধ ৱিমুখস্য হৃদিস্থ মৌঢ্যম্
গীতামৃতেন শমিতং কিল যেন সদ্যঃ।
ৱেদান্তৱেদ্যমনঘং পুরুষং পুরাণম্
তং পার্থসারথিমহং প্রণতোঽস্মি ভক্ত্যা॥ **3** ॥

## অথ স্তোত্রম্

ওং শ্রীকৃষ্ণঃ পার্থসূতঃ শ্রীতুলসীৱনসংশ্রিতঃ।
ঈশ ঈড্য ইলাকান্তো লীলার্থমনুজাকৃতিঃ॥ **1** ॥

কৃতভারতযুদ্ধার্থসূতৱেষঃ শ্রিযঃপতিঃ।
ৱ্যাসপ্রত্যক্ষিতস্ৱার্চৱিগ্রহো ৱিমলো ৱিভুঃ॥ **2** ॥

কৃষ্ণার্তিঘ্নঃ কৈরৱিণীসরস্তীরৱিহারভূঃ।
রুক্মিণী সাত্যকীরামপ্রদ্যুম্নোষাধৱান্ৱিতঃ॥ **3** ॥

আত্রেযপূজাসন্তুষ্টো ৱৃন্দারণ্যকৃতালযঃ।
আনন্দাখ্যৱিমানস্থ আত্রেযর্ষিপ্রতিষ্ঠিতঃ॥ **4** ॥

প্রপন্নাগোহরঃ পার্থরাজ্যদো রুক্মিণীপ্রিযঃ।
শঙ্খরাডদক্ষিণকরো ৱরদেতরপাণিমান্॥ **5** ॥

নন্দকী গোৱিন্দ উরুক্রমঃ কল্যাণকারণম্।
সুমত্যাখ্যনৃপশ্রেষ্ঠৱরদো ৱেঙ্কটেশ্ৱরঃ॥ **6** ॥

নীলাধৱো ধরানন্দৱর্ধনো ৱৃষ্ণি পুঙ্গৱঃ।
সুমত্যৱনিপালার্থকুটুম্বসহিতঃ সুধীঃ॥ **7** ॥

ৱেদৱেদ্যোঽচ্যুতো যজ্ঞমূর্তির্যজ্ঞভুগুত্তমঃ।
সুমতিপ্রেমরচিতমহোৎসৱৱিধিপ্রিযঃ॥ **8** ॥

মহামতির্মহাভাগো মহাযোগী কৱিপ্রিযঃ।
ৱিষ্ণুর্ৱেঙ্কটকৃষ্ণাখ্যো ৱরদো ৱৎসলোঽনঘঃ॥ **9** ॥

সালিগ্রামশিলামালী পীনৱক্ষাঃ প্রিযোৎসৱঃ।
কেশৱার্যেষ্টিসন্তুষ্টো যতীন্দ্রোৎপত্তি কারণম্॥ **10** ॥

মযূরনগরীনাথো জগদ্দুরিতভঞ্জনঃ।
গীতোপনিষদাচার্যো ৱিশ্ৱরূপপ্রদর্শনঃ॥ **11** ॥

ভক্তিসারতপস্তুষ্টোঽনন্তোঽনন্তগতিঃ পতিঃ।
ভক্তিসারস্তুতস্তোত্রপ্রিযঃ পক্ষীশ্ৱরধ্ৱজঃ॥ **12** ॥

পরকালাদিসূক্তীড্যো ৱাসুদেৱঃ সুরারিহা।
ইন্দ্রসোমাগ্নি ৱরুণমীনতীর্থৱিহারভূঃ॥ **13** ॥

গম্ভীরাম্ভস্সমদ্ভূতসদ্যঃসম্ফুল্লপদ্মদৃক্।
পঞ্চমূর্তিঃ পঞ্চহেতিঃ পঞ্চবাণপিতা হরিঃ॥ **14**॥

মন্মথো ৱেদৱল্লীশো শ্রীশঃ সর্ৱশুভাশ্রযঃ।
ভৃগুপুত্রীপ্রিযো দেৱঃ ভৃগ্ৱারাধনতোষিতঃ॥ **15**॥

চতুর্ভুজঃ পদ্মনাভঃ শেষশাযী সুখাযনম্।
মাঘশুক্ল দ্বাদশীকৃতোদ্বাহশ্চ কৃপানিধিঃ॥ **16**॥

রামঃ সীতাসমাযুক্তো মধুমদ্ৱরদো ৱসুঃ।
সসৌমিত্রিঃ সভরতঃ সাঞ্জনেযো ধনুর্ধরঃ॥ **17**॥

গজেন্দ্রৱরদস্তার্ক্ষ্যসমারূঢো নৃপার্চিতঃ।
আরূঢযোগো নৃহরির্মৌদ্গল্যৱরদোঽমলঃ॥ **18**॥

শরণ্যঃ শরণঃ শান্তঃ শরণাগতৱৎসলঃ।
মহামন্ত্রার্চনপ্রীতো মহৈশ্ৱর্যপ্রদাযকঃ॥ **19**॥

ফলশ্রুতিঃ

য ইদং পরমং পুণ্যং নাম্নামষ্টোত্তরং শতম্।
পার্থস্য সারথেঃস্তোত্রং সর্ৱাভীষ্টপ্রদাযকম্॥ **1**॥

প্রত্যহং প্রাতরুত্থায প্রযতঃ পঠতে নরঃ।
তস্য ৱিদ্যা ধনং শান্তিঃ পুষ্টিস্তুষ্টিশ্চ জাযতে॥ **2**॥

স্ৱযমেৱ হরিঃ সাক্ষাৎ ভূৎৱা সারথিরুত্তমঃ।
তস্য জীৱনযাত্রাযাং কুরুতে সর্ৱমঙ্গলম্॥ **3**॥

॥ ইতি শ্রী পার্থসারথ্যষ্টোত্তরশতনামস্তোত্রং সমাপ্তম্॥